| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणानि । | छन्दसामुदाहरणानि । |
|---|---|---|
| त्रिंशदक्षरा वृत्तिः ।<br>अर्णः | प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूत-<br>लीलाकरोद्दामशङ्खादयः<br>प्रतिचरणं चण्डवृष्टिप्रपातस्य इत्यर्थः ।<br>।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | जय जय जगदीश विष्णो हरे राम दामोदर श्रीनिवासा-<br>च्युतानन्त नारायण<br>त्रिदशगणगुरो मुरारे मुकुन्दासुरारे हृषीकेश पीताम्बर<br>श्रीपते माधव ।<br>गरुडगमन कृष्ण वैकुण्ठ गोविन्द विश्वम्भरोपेन्द्र चक्रायुधा-<br>धोक्षज श्रीनिधे<br>बलिदमन नृसिंह शौरे । भवाम्भोधिघोरार्णवे त्वं निमज्जन्त-<br>मभ्युद्धरोपेत्य माम् ॥ |
| सिंहविक्रीडः | यकारैः कवीन्द्राशुरीघाभिबद्धैः प्रसिद्धो विशुद्धो<br>ऽपरो दण्डकः सिंहविक्रीडनामा<br>।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ | |
| एकत्रिंशदक्षरा वृत्तिः ।<br>अर्णवः<br>अशोकमञ्जरी | ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ<br>स्वेच्छया रजौ क्रमेण संनिवेशयत्युदारधीः कविः<br>स दण्डकः स्मृतो जयत्यशोकमञ्जरी<br>ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ | अर्णोवदर्णवादीनामप्युदाहरणानि बोद्धव्यानि ॥ |
| षट्त्रिंशदक्षरा वृत्तिः ।<br>व्यालः | ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | |
| ऊनचत्वारिंशदक्षरा वृत्तिः ।<br>जीमूतः | ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,<br>ऽ।ऽ | |
| द्विचत्वारिंशदक्षरा वृत्तिः ।<br>लीलाकरः | ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,<br>ऽ।ऽ,ऽ।ऽ | |
| पञ्चचत्वारिंशदक्षरा वृत्तिः ।<br>उद्दामः | ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,<br>ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | |
| सिंहविक्रान्तः | नयुगलगुरुयुगैवं यकाराः कवीन्द्राशुरीघा-<br>स्तदा यत्र वध्यन्त एषोऽपरो दण्डकः पण्डितै-<br>रीरितः सिंहविक्रान्तनामा<br>।।।,।।।,।,ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,<br>।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ | |
| अष्टचत्वारिंशदक्षरा वृत्तिः ।<br>शङ्खः<br>इत्यादयः ।<br>इति समवृत्तानि समाप्तानि ॥*॥ | ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,<br>ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | |
| अथार्द्धसमवृत्तानि ।<br>उपचित्रम् ११ । ११ वृत्तिः । | विषमे यदि सौ सलगा दले भौ युजि भाद्-<br>गुरुकावुपचित्रम् ।<br>द्विरावृत्त्या श्लोकः पूरयितव्यः | |
| प्रथमपादे तृतीयपादे च<br>द्वितीयपादे चतुर्थपादे च | ।।ऽ,।।ऽ,।।ऽ,।,ऽ<br>ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ | सुरवैरिवपुस्तनुतां सुदं हेमनिभांशुकचन्दनलिप्तम् ।<br>गगनचपलामिलितं यथा शारदनीरधरैरुपचित्रम् ॥ |
| वेगवती १० । ११ वृत्तिः । | विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती<br>स्यात् | |
| प्रथमपादे तृतीयपादे च<br>द्वितीयपादे चतुर्थपादे च | ।।ऽ,।।ऽ,।।ऽ,ऽ<br>ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ | स्मर वेगवती व्रजरामा केशववंशरवैरतिमुग्धा ।<br>रभसान्न गुरून् गणयन्ती केलिनिकुञ्जगृहाय जगाम ॥ |